This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री ॥ [illegible] शाय नमः ॥ चेतोगं मत तनुपत्तिमाधिमनुते नंतु सत्तिर्यस्य [illegible] अंबरपारे [illegible] नतरसमुद्धने सेवे [illegible] भिणी
तमेवं नक्तं यद्यपि द्वित्रिभिः स्मृतेः परमर्शनं ॥ तदपि च [illegible] रं सुधियो मुध्य शानुमीशं तं ॥१॥ अथ नक्तनिर्णी
तं ॥ नक्तं च कालविशेषनियंत्रितभोजनं नक्तोपोव्रतविशेषः ॥ तच्च रात्रिदिनरूपकालभेदात् द्विविधं ॥ तत्रादिवा नक्तं नपू
र्वं रात्रिभोजनमिति रात्रिनक्तस्वरूपं ॥ अपराह्णांतकाले नक्तं नपूर्वं न हुत्तरकाले नक्तं नंतु दिवानक्तस्येति विवेकः ॥ त
था च माधवीये वाराहे ॥ मार्गशीर्षे सिते पक्षे प्रतिपत्प्रतितिथिर्भवेत् ॥ तस्यां नक्तं प्रकुर्वीत रात्रौ विष्णुं च पूजयेत् ॥ इति अत्र
नक्तशब्दो भोजनपरः ॥ कालपरत्वे विरुद्धः संभवात् ॥ तस्य च रात्राविति कालविधिः ॥ रागतः प्रसक्तस्य सायंप्रातरिति
नियमप्रापितस्य च भोजनस्य विधिर्वैयर्थ्यात् द्विशेषणादेवलाभः ॥ अन्यमपि दर्शितं स्कांदे ॥ प्रदोषव्यापिनी न स्याद्दिवा
नक्तं विधीयते ॥ आत्मनो द्विगुणां छायामतिक्रामति क्रामति क्रामति क्रामति भास्करे ॥ तन्नक्तं नक्तमित्याहुर्न नक्तं निशि भो
जनमिति ॥ अत्रैकं नक्तपदं भोजनपरं ॥ तेन निशि भोजनमेव न नक्तमपि त्वीदृशे भास्करे सति । यद्भोजनं तत्तदपि नक्तमि
ति धर्मविद आहुः ॥ रात्र्यनशन एव नक्तं प्रसिद्धः कथमेवं तन्नक्तं इत्यमिति संशयाकुलितमालक्ष्य प्रथमत एवाह ॥ प्रदो
षव्यापिनी न स्यादिति ॥ अत्र नक्ते प्रदोषव्यापिनी न स्यात् तावता भवतु प्रदोषस्य तत्काले भावेन तद्व्याप्तेर्न निर्णायकत्वादिति
१४२ भावः ॥ कुत एतत्तत्राह ॥ दिवानक्तमिति ॥ रात्रिनक्ते प्रदोषस्य निर्णायकत्वेन तु दिवानक्तेपीति भावः ॥ यथा श्रुतार्थपरत्वं तु न
युक्तं तथा सति न नक्तं निशि भोजनमिति रात्रिनक्तोच्छेदापत्तेः ॥ यत्तु प्रदोषव्यापिनी स्यादिति स्कांदे [illegible]

नक्तनिर्णयः

Acc. NO. ~~6043~~ M-1641
Title - नक्तनिर्णयः
Author - मणिराम मुकुन्द देव.
Date - संवत् 1880 / शके 1755.
Sub - धर्मशास्त्र.

folio - 7
Xerox - 13

Checked 2012

KKSU LIBRARY RAMTEK 441106 M-1641 Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ प्रोसकलसाधर्म्येण दिवैव नक्तं विधीयते नक्तस्य दिवारात्रिव्रतत्वेन प्रदोषव्याप्तेरिव सायंव्याप्तेरपि निर्णायकत्वात्। किंतु प्र
दोषमुख्यः सायाह्नस्तु गौण इत्यनन्यालं इति जाबालिवचनादवगम्यते। दिवारात्रिव्रतत्वं तु प्रदोषव्यापिनी स्यादिको
मेवावक्यात् प्रतीयत इति भावः। वस्तुतस्तु खिस्यां प्रदोषव्याप्त्यभावे दिवानुष्ठाने सति त्रयोदशीनक्ते शिवप्रदोषव्रतेपि दिवानुष्ठान
स्य शिष्टाचारविरुद्धस्य न्यायसामान्यापत्तेः॥ न च तत्र शिवपूजायाः प्राधान्यात्तस्याश्च रात्रौ विधानात्तदंगभूतस्य नक्त
स्य न दिवा प्रसक्तिरिति शंक्यं। न्यायसाम्येन प्रदोषास्य शैवे शिवपूजाया अपि दिवानुष्ठानप्रसक्तेः॥ किंच प्रदोषाव्याप्तौ दिवा
नक्ताचरणमित्यत्र न किंचिन्मानमस्तीति। न च तथात्वे परत्र स्यादस्ताद्वीग्यतो हि सेति जाबालिवचनात्तादृशार्थः प्रतीतेः
अन्यथा त्वेउभयत्र प्रदोषव्याप्तौ परत्र परदिने नक्तं स्यात्। तत्र हेतुरस्ताद्वीगिति। अस्तात्पूर्वं यतः सा तिथिः परेह्नि न विद्य
तेः न तत्र स्यां नक्तं कार्यमित्यर्थः। प्रदोषास्तात्पूर्वेपि संकल्परूपव्रतारंभकालव्यापित्वादिति भाव इति हि वचनार्थः॥ नहीदृ
शोऽर्थे भवदभिमतोर्थः संभवति किंच रात्रिनक्तस्यैव दिवारात्रिव्रतत्वमिति निर्मूलत्वाद्व्याहतं। यत्तु। प्रदोषव्यापिनी य
त्रित्रिमुहूर्त्तादिवा यदा। तदा नक्तं प्रकुर्वीत स्वाध्यायस्य निषेधवदिति कौर्मवचनं तत्र मूलमिति तन्न। यत्र यस्यां तिथौ
नक्तं विहितं सा यदा प्रदोषव्यापिनी भवेत् तदा नक्तव्रतं कुर्यात्। त्रिमुहूर्त्तादिवा यदेत्यर्थांतरन्यासभंग्या दृष्टांतार्थं यथा
दिवानक्ते भवदभिमते सौरे वा त्रिमुहूर्त्तात्मकसायाह्नव्याप्तिर्नियामिका तथा रात्रिनक्ते प्रदोषव्याप्तिरिति। स्वाध्या
यस्य निषेधवदित्यपि दृष्टांतांतरं। नहि प्रदोषोऽनध्ययनप्रयोजक इति प्रसिद्धमेव। अथवा रात्रिदिवानक्तयोः क्रमेण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कालद्वयमनेन प्रदर्श्यते । सामान्यतो नक्तपदश्रुतेरिति तद्वचनं तथा व्याख्यानं तु । नक्तस्योभयरूपत्वे तु उक्तस्य दिवाभोजनराहित्ये
सति रात्रिभोजनमिति व्रतस्वरूपस्यानुपपत्तेश्च । एतेन प्रदोषस्य मुख्यकालत्वं सायाह्नस्य गौणत्वमित्यपि परास्तं । तस्मात्प्रदोष
व्यापिनी न स्यादिति स्कान्दवचनेन दिवानक्तव्रतस्वरूपमभिधीयते न तु रात्रिनक्तस्य प्रदोषास्पर्शेऽनुकल्पविधिरयमिति सूक्ष्म
दृशामवधानत्वमिति दिक् । अत्रापि रात्रिनक्तसाधर्म्योद्भूतसामान्येऽन्नानस्य प्रायः पूर्वं गत्वाच्चपूर्वान्तलाभः । यत्तु दिवाभोज
नराहित्ये सति रात्रिभोजनं व्रतस्वरूपमिति माधवादयस्तद्दिवानक्तेऽभावादुपेक्ष्यं । ननु नक्तपदस्य नक्तस्य रात्रौ लक्षणात
यातद्भोजनपरत्वे दिवाशनपरत्वे न मानमिति चेत् । नास्मृतिकृत्संकेतस्य तत्र मानत्वादिति ॥ अथ रात्रिनक्ते कालविशेषनिय
मं दर्शयति व्यासः । तत्र नक्तं प्रकुर्वीत इति शास्त्रस्य विनिश्चय इति ॥ तत्र प्रदोषे । वत्सोऽप्याह । प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते
सदा एकादशीं विना सर्वा शुक्ले कृष्णे तथा स्मृता इति ॥ प्रदोषव्यापिनीति ॥ प्रदोषस्य नक्तकालत्वात्तद्व्यापिनी तिथिर्ग्राह्या ॥ कर्मणो
यस्य यः कालस्तत्कालव्यापिनी तिथिरिति वचनादिति भावः ॥ एतेन यत्र तिथौ नक्तं विहितं तस्या उभयत्र सत्त्वे कृते तत्कार्यमिति संश
यप्रदोषव्यापिन्यां कार्यमनेन तत्रैति तिथिनिर्णायकमतेऽन्तनक्तकालावेदकमिति शंका निरस्ता । नक्तव्रते । रात्रिनक्ते तत्रैव प्रदोषव्या
परपेक्षणादिति भावः ॥ अत्रैकादशीं विनेति पर्युदासैकादश्यां निशानक्तेऽपि न प्रदोषव्यापित्वापेक्षेति सूचयति । अत एव प्रदोषव्यापिनी ग्रा
ह्या सदा नक्तव्रते तिथिः । उदयस्था सदा पूज्या हरिनक्तव्रते तिथिरिति स्कान्दे उदयकालव्यापितिथिग्राह्यत्वमुच्यते । हरिनक्तव्रते हरिदेव
नाकेकादशीप्रयुक्तनक्तव्रतेऽस्यार्थः । एतच्च स्वतन्त्रैकादशीतिथिप्रयुक्तनक्ते प्रदोषव्यापित्वापेक्षणेन तदपवादकं न तूपवासप्रतिनिधिरूप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नक्ततिथिनिर्णायकं। उपवासतिथिनिर्णयत एवैकभक्तवन्नक्तनिर्णयसंभवात्। एतेनैकादश्युपवासप्रतीतिनिषेधि नक्तनिर्णायकमेतदिति
मदनरत्ने नक्तमयास्तं न तु सायाह्न कालिकत्वेन दिवानक्तं रात्रिनक्तं तो भिन्नमभिमतं यथायथोदयकालिकत्वेनैकादश्यां नक्तमप्युभा
भ्यामतिरिक्तमेव किं न स्यादिति चेव्रतस्योदयकालिकासत्वात्। नहि सायाह्ने भुजिक्रियायां प्रदोषेभिसार्यादिवदुदयकालविधिः क्व नच
चिदुपलभ्यते॥ स्कांदवचनं तु संज्ञायेतिथिनिर्णायकमेवेति न किंचिदेतत्। तस्मादेकादशीप्रयुक्तेन रात्रिशेन नक्ते प्रदोषः कालस्त
द्व्याप्तिश्च निर्णायिकेति स्थितं॥ प्रदोषप्रमाणमाह स्कांदे। प्रदोषस्त्रिमुहूर्तः स्याद्भावस्तंगते सतीति। मदनरत्ने समयोद्योते
प्याह॥ त्रिमुहूर्तं प्रदोषः स्याद्भावस्तंगते सति। तत्र नक्तं प्रकुर्वीतेति शास्त्रस्य निश्चय इति। यत्तु प्रदोषोस्तमयादूर्ध्वं घटि
द्वयमिष्यत इति वत्सवचनं यच्च स्मृत्यंतरे प्रदोषोस्तमयादूर्ध्वं घटिकात्रयमिष्यत इति तदनध्यायादिप्रयोजकप्रदोषकालाभि
भिधायकं न तु नक्तकालच्छेदकमिति न तद्विरोधः। सत एव इति शास्त्रस्यैव निश्चय इति निष्कर्षः संगच्छते॥ दिवानक्तकालस्तु
प्रदर्शितः स्मृत्यंतरे। यदा तु द्विगुणां छायां कुर्वीत पतिभास्करः। तत्र नक्तं विजानीयान्न नक्तं निशि भोजनं॥ स्कांदेपि एवं सौता
न्ते। विद्वान् सायाह्ने तु भुजिक्रियां कुर्यान्नक्तव्रती नक्तफलं भवति निश्चितं॥ इति। एवं शान्तवेति। इत्थमुक्तरीत्या नक्तस्वरूपं ज्ञा
तेस्यार्थः। नक्तव्रती दिननक्तव्रती। नक्तस्य रात्रिप्रसिद्धेः कथमेतदाश्वसनीयमिति संदिहानं प्रत्याह। नक्तफलं भवति निश्चित
मिति। एवं च फलभावस्य भावेन तत्वेन संदेहः कार्य इत्यर्थः। केचित्तु नरस्य द्विगुणां छायामतिक्रम्य मेघप्रदर्शिनः। तदा सौरं चैरं न
[illegible] तिथि [illegible] महन्तौ नंदिने नक्तं प्रवदंति मनीषिणः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नक्षत्रदर्शनान्नक्तमहं मन्ये गणाधिप इति। मुहूर्तोनं दिनं नक्तं नक्तकालं मनीषिणः। सौरस्यादिधर्मविदः प्रवदन्ति
।अहं हि शिवस्तु नक्षत्रदर्शनादपि नक्तं नक्तकालं मन्ये इत्यर्थः॥ केवलं सौरस्यादिधर्मवेत्तारो दिनमेव नक्तकालमामनन्ति।
तेषामन्यत्र प्रयोजनस्यासत्वात्। सकलधर्मवेत्ताऽहं तु दिनं रात्रिं च नक्तकालौ वेद्मीत्यर्थो विष्करणाय मनीषिणो हमित्युक्तिः।
अत्र नक्षत्रदर्शनादित्यनेनोपपञ्चमी नक्षत्रदर्शनमारभ्येत्यर्थस्तेन त्रिमुहूर्तात्मकप्रदोषस्य नक्तकालबोधकवचनेन नास्ति विरो
धः। यत्तु अयं च प्रदोषो नक्तव्रतस्य मुख्यः कालोऽस्तमयाद्वीचीनो मुहूर्तस्तत्तु कल्पः। मुहूर्तोनादनस्यान्यमतत्वेन नक्ष
त्रदर्शनोत्तरकालस्य तु शिवेन स्वमतत्वेन भविष्ये भिहितत्वादितरत्प्रदीपसमयो घाते मदनसिंहस्तत्वमनोहरं॥ अनु
कल्पकल्पने प्रमाणाभावात्। किंच अन्यमतत्वेनाभिधाने स्वस्यानभिप्रेतत्वमर्थलभ्यं तथा सति प्रदोषव्याप्त्यादिवा नक्त
चरणं न सिद्धं तत्स्वमतमिति नक्ताविधाविषये व्रतलोपापत्तिरपि प्रसज्येत। न चेष्टापत्तिः शिष्टाचारादिविरुद्धत्वात्। अपि च।
सिद्धान्तो नाभिप्रेतार्थं प्रति जानतामेकदेशिनां नमनीषित्वमिति नदुक्तिनैस्वारस्यमावहेत्। न च भविष्यवचोऽनर्थकं व्याख्या
नस्य प्रदर्शितत्वादिति दिक्। यत्तु यत्र सप्तमी रविवारादौ सौरनक्तव्रतं विहितं तत्रोक्तविपर्यासेन सायंकालो मुख्यः प्रदो
षोऽनुकल्प इत्युक्तं त्रिमुहूर्तस्पृग्वा हि दिना चैतावती तिथिः। तस्यां सौरं भवेन्नक्तमहन्येव तु भोजनमिति सुमन्तुवाक्यं
तत्राधश्छं भकमुदाजहार माधवस्तदप्यसारं। सौरनक्ते प्रदोषकालिकत्वस्याप्रसिद्धेः॥ न चोक्तवचनव्याकोपः। त्रिमुहू
र्तात्मकसायाह्नस्पृग्वा या तिथिस्तत्तु कालान्तरव्यापिनी तस्यां सौरं सूर्यसंबंधी दिवा नक्तं चरेत्। ईदृक्तिथिग्रहेपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्रतं कदाचरेत्तत्राह। अहन्येव तु भोजनमिति। निशि चैतावती सर्थांतरन्यासः। एवं च सति नानुकल्पत्वकल्पनं न वासो
रदिवानक्तयोर्भेदत्वकल्पनागौरवं चेति दिक्। तत्र रात्रिनक्ते प्रदोषव्याप्तिर्नैयामिका दिवानक्ते तु सायाह्नव्याप्तिरिति
सिद्धं। तत्र प्रदोषव्याप्तिः षोढा। पूर्वत्रैव। १ परत्रैव २ नोभयत्र ३ उभयत्रापि ४ साम्येनांशव्याप्तिः ५ वैषम्येणेति ६ तत्रैके
कव्याप्तौ न संदेह एव। उभयत्रासत्वे परे स्याह जाबालिः॥ अतथात्वे परत्र स्यादस्तादर्वाग्यतो हि सेति। अत्र वा नक्तव्रतुगौ
प्राक्। उभयत्रसत्वेप्याह स एव। संदेहति थ्योरुभयोः प्रदोषव्यापिनी तिथिः। तत्रोत्तरत्र नक्तं स्यादुभयत्रापि सत्
यत इति॥ तत्रैतादृशव्याप्तौ। उत्तरत्र उत्तरप्रदोषव्यापिन्यां नक्तं स्यात्। कुतस्तत्राह। उभयत्रापीति॥ दिवा रात्रौ च
सा तिथिरस्ति यतोऽतो ग्राह्येत्यर्थः। संकल्पकाले व्याप्तेराधिक्यादिति भावः। साम्येनांशव्याप्तावपि परा संकल्प सं७
कालव्यापित्वात्। वैषम्येणांशव्याप्तौ त्वाधिक्यान्निर्णयः। तत्रापि परा गौणमुख्योभयकालव्यापित्वादिति भा
वः। गौणमुख्यव्यवहारस्यासत्वेन व्रतानुष्ठानकालाधिकव्याप्तिरत्र निर्णायिकेत्येव तु युक्तं। एवं दिवानक्तेपि न्याय्यतो
न्यायः पूर्वत्र सत्वे पूर्वा उत्तरत्र सत्वे तूत्तरा उभयत्रासत्वेपि परैव संकल्पकालव्यापित्वात्। उभयत्र सत्वेपि परा उभय
कालव्याप्तित्वात्। अत एव साम्यादंशव्याप्तावपि परा वैषम्यांशव्याप्तौ बाहुल्यं निर्णायकमित्युक्तं संक्षेपः। सौरे नक्ते
एकदेशव्याप्तौ पूर्वा प्रदोषे सत्वेन गौणकालव्याप्तेराधिक्यादिति माधवीयत्वं गौणमुख्यव्यवहारस्य गगनकुसुमा
यमानत्वादुपेक्ष्यं [illegible]यप्यत्र स्वतः प्रदोषो नक्तकाल इति प्रतिभासते तथापि त्रिदंडोनास्तुर्यदंडस्यैव भोजने मुख्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तमुदयात्प्राक्तना संध्याघटिकात्रयमिष्यते। सायं संध्या त्रिघटिका अस्तादुपरि भास्वत इति स्कांदात् घटीत्रयस्य संध्या
त्वात्। तत्र च। चत्वारि इमानि कर्माणि संध्यायां परिवर्जयेत्। आहारं मैथुनं निद्रां स्वाध्यायं च चतुर्थकमिति भोजननिषेधा
त्। यत्तु निशानक्तं तु विज्ञेयं यामार्द्धं प्रथमे इति वचस्तन्निषेधैकवाक्यतया तुर्यघटिकायामेव नक्तकालत्वव्यवस्थापनप
रमिति न तद्विरोधः। यत्तु संध्यायां च भोजननिषेधो रागप्राप्तभोजनविषयो विधिप्राप्तस्यानिषेधायोगादिति मदनरत्नस्त
न्न। विधिनिषेधयोरसांकर्येणाविरोधादित्याहुः। ततः परं मुहूर्तत्रयावधि गौणः। रात्रौ कुर्वीत नक्तमित्यभिधानान्निशी
सं१ थावधि गौण इति केचित्। दिवानक्ते तु चरमो मुहूर्तो मुख्यः उपान्त्यो मध्यमस्तत्प्राचीनो जघन्य इत्याहुः तावत्। अथोभय
विधनक्तस्याधिकारिभेदाद्व्यवस्थामाह माधवीये देवलः। नक्षत्रदर्शनान्नक्तं गृहस्थस्य बुधैः स्मृतं। यतेर्दिनाष्टमभा
गे तस्य रात्रौ निषिध्यत इति॥ तत्रैव स्कांदेपि॥ नक्तं निशायां कुर्वीत गृहस्थो विधिसंयुतः। यतिश्च विधवा चैव कुर्यात्त
त्सदिवाकरं। सदिवाकरं त्रयोक्तं मन्निमं घटिकाद्वयं। निशानक्तं तु विज्ञेयं यामार्द्धं प्रथमे सदेति। अत्र देवलस्मृतौ यतेर्दिवा
नक्तेधिकारित्वं कुत इति शंकायां हेतूपन्यासनं तस्य रात्रौ निषिध्यत इति। एवं च रात्रिनक्ते निषिद्धानां दिवानक्ताधिकारित्व
प्रतीतेः यतिरित्येतत्सर्वेषामुपलक्षकं। एवं यतिश्च विधवा चैवेति चकारेणानुक्तसमुच्चयार्थे भापुत्रगृहिविधुरसोरधामि
णः संगृहीताः। एवं रविवारसंक्रांत्यादिषु रात्रिभोजननिषेधे गृहस्थानामपि दिवानक्त एवाधिकारः। अधिकारितो
प्रयोजकस्याविद्यमानत्वात्। स्फुटमप्युक्तं भविष्यपुराणे। पत्याद्यसादने ब्रह्मन्नक्तं कुर्वंति मानवाः। दिनांते तेपि भुंजी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४

रात्रिनिषेधाद्रात्रिभोजनइति।नचैतत्सौरविषयंनतुगृहस्थस्यापिविषयमपीतिभ्रमितव्यं।आदित्यस्यसंबंधिनिदिनेयेनन

क्तंनक्तव्रतंकुर्वंतितेपिमानवाःदिनस्यांतेचरममुहूर्त्तेभुंजीरन्तत्रकारणमाहनिषेधादितिवाक्यव्याख्यानेतथो

र्थोऽभात्।नहिरथसप्तम्यादिषुरविसंबंधोनेतरत्रेत्यत्रास्तिमानं।एतेनादित्यवारसंक्रांत्यादिषुरात्रिभोजननिषे

धस्याऽनग्नप्राप्तविषयत्वात्सप्तम्यादिषुनक्तव्रतेरविवारादियोगेपिरात्रावेवकर्तव्यमितिरत्नाद्युक्तमपास्तं।रात्रिनक्त मदन

स्याप्रसक्तेः।अतएवनक्तेषुप्रदोषव्यापितिथिग्रहणेपिभानुवारसंक्रांत्यादिषुगृहस्थस्यरात्रौभोजननिषेधात्सौ

रिदिवैवनक्तंकुर्यादित्युक्तं।तत्रोपादेयंभक्तमुक्तंभविष्यमुदाजहारमाधवः।अनुकल्पेसत्तुविवादःपर्यवसितैःसौ

वातसहृदयसुधियोविभावयंत्वितिदिक्।तदत्ररात्रिदिनभेदान्नक्तंद्विविधंक्रमेणचप्रदोषःसायाह्नश्च

तत्कालोयथाक्रमंरात्रौनिषिद्धानिषिद्धाश्चाधिकारिणइतिनिर्णीतं।अथैकस्मिन्दिनेनक्तैकभ

क्तयोःप्रसक्तौकिंनक्तंकार्यमुतैकभक्तंकिंवासत्प्रतिपक्षन्यायेनोभयोरप्यनुष्ठानमेवेति।नचेदमसंभ

विभाव्यंयोन्नदशहरणोक्तरथसप्तमीव्रतेतृतीयादिसप्तम्यंतदिनेषुक्रमेणैकभक्तायाचितोपवासपारणानि

विधीयंते॥तत्रयदातृतीयायामत्रयंततश्चतुर्थीपरदिनेवक्षयवशाद्यामत्रयादर्वागेवसमाप्तातत्रकिं

तृतीयानिमित्तमेकभक्तंभवेदथचतुर्थीप्रयुक्तंनक्तमितिसंशयसंभवादितिचेदुच्यते।प्राथम्यादेकभक्त ४

स्यबलवत्त्वेनानुष्ठानंनक्तेनैककल्प्यःसत्त्व [illegible] नवेतितत्रयदाचतुर्थीश्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्विवशात्तत्संकाले व्याप्नोति तदा गौणकालव्याप्तेः सत्वेनोत्तरदिने स्वयं कुर्यात्। अन्यथा पुत्रादिनेति व्यवस्था
निमाधवः। संकल्परूपव्रतारंभकालव्यापित्वेनेति युक्तं। एतच्चव्रतं प्रधानं कश्चिदुपवासप्रतिनिधिः केचिदंगं
गमिति त्रिविधं तत्र वराहे मार्गशीर्षद्वादश्यादिनोक्तमाद्यं द्वितीयमपि कौर्मेमार्कंडेययोः एकभक्तेन नक्तेन वाऽद
यज्ञानुरागाद्दश्विति। तृतीयं तु त्रयोदशी शिवव्रतांगभूतमिति। अथात्र प्रसंगतः शिवप्रदोषव्रतं विविच्यते। तत्र
प्रदोषव्रतस्वरूपं ब्रह्मोत्तरखंडे। पक्षद्वये त्रयोदश्यां निराहारो भवेद्दिवा। घटीत्रयमस्तमयात्पूर्वं स्नानं समा
चरेत्। शुक्लांबरधरो भूत्वा वाग्यतो नियमान्वितः। कृतसंध्याजपविधिः शिवपूजां समारभेदिति वचनाद्दिवा
नक्तानपूर्वं त्रयोदशी प्रदोषकालिकशिवपूजोत्तरकाले भोजनमिति। अत्र घटित्रयमस्तात्पूर्वं स्नानविधिः॥
पंचसूत्रपार्थिवलिंगपूजाविषयस्तत्र हि अस्ताव्यवहितपूर्वस्नाने संध्योपासनानंतरं तावद्रूपलिंगनिर्माणप्र
सक्तौ कालातिक्रमाज्जघन्यकाले भोजनप्रसक्तेः। लिंगांतरादिपूजायां त्वस्ताव्यवहितपूर्वमेव स्नानमेतद्
दृष्युक्तं स्कांदे। ततस्त्ववगाहते भानौ स्नात्वा सुनियतो व्रती। पूजास्थानं ततो गत्वा प्रदोषे शिवमर्चयेदिति। स्कां
देपि। एकवत्सरपर्यंतं प्रतिपक्षं त्रयोदशी। प्रदोषे शिवमभ्यर्च्य नक्तं भोक्ष्यामि शंकरेति। त्रयोदशीमित्यस्य प्राप्ते
तिशेषः। अत्र यद्यपि पूजनं योः प्रदोष एवविधानादुभयोरपि साम्यं प्रतीयते तथापि पूजनं प्रधानमंगं भोजनमा
अत एव हेमाद्रौ कौर्मे त्रयोदश्यां तथा रात्रौ सोपहारं त्रिलोचनं। दृष्ट्वेशं प्रथमे यामे मुच्यते सर्वपातकैरिति

त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग१ पूजामात्रविधिस्त्वस्मः संछ्यते। अत्रहि रात्रौ यामेउपस्थिते तत्रासायेत त्रापि प्रथमे पूर्वार्द्धे त्रिःकोचर्नसंगम
विमुक्ते प्रसिद्धं लिंगमुपक्षिपत इत्युपहारः पूजोपकरणेन सहितं पूजितमिति यावत्। तथाभूतं दृष्ट्वा येनै
न च दर्शनेन सर्वपातकैर्मुच्यत इत्यर्थः। पूजाविधिरुक्तो यतो पूजनाशक्तस्यान्यपूजितलिंगदर्शनमप्येतत्फल
जनकमित्यावेदनायेवमुक्तिः। पक्षद्वय इति वाक्ये शिवपूजां समारभेदिति। ततस्तु लोहित इत्यत्र प्रदोषे शिवम
र्चयेदिति च स्पष्टं केवलपूजाविधानोक्त्या। एतेन पूजाभोजनोभयमपि प्रधानमिति केषांचिदुक्तिः परास्ता। अ
त्र प्रधानांगयोर्द्वयोरपि प्रदोष एव विधानादस्ति नरैः प्रदोषाद्यं दंडत्रयमध्ये शिवं संपूज्य तु येनाद्या भोक्तव्य
मिति मुख्यः। अन्ये त्वशक्तविषया अनुकल्पा एवेत्यवधेयं। इदं च शिवोपास्तिमतां नित्यं काम्यं तु सर्वेषामपीति
स्कांदात्सेस्पष्टं। अत्र च परलावशेषो देशेन व्रतानुष्ठाने प्रारंभे कालविशेषः प्रदर्शितः स्कांदे देव्युवाच। दे
वकेन विधानेन प्रदोषव्रतमुत्तमं। विधातव्यं नरैः स्त्रीभिः संतानफलसिद्धये। ईश्वर उवाच। यदा त्रयोदशी
शुक्ला मंदवारेण संयुता। आरब्धव्यं व्रतं तत्र संतानफलसिद्धये। ऋणमोचनार्थं तु भौमवारेण संयु
ता। सौभाग्यश्रीसमृद्ध्यर्थं शुक्रवारेण संयुता। आयुरारोग्यसिद्ध्यर्थं भौमवारेण संयुता। एकवत्सरप
र्यंतं प्रतिपक्षत्रयोदशीं। प्रदोषे शिवमभ्यर्च्य नक्तं भोक्ष्यामि शंकर। ततस्तु लोहिते भानौ स्नात्वा तु नियतो
व्रती। पूजास्थानं ततो गत्वा प्रदोषे शिवमर्चयेत्। एवं [illegible] करिष्यामीदं व्रतमिति पापक्षयादिकामना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

याम्नित्येन्चनका(?) विशेषनियमः। परं तु अत्राप्यारभ्य दाकदा(?)वाशानयागप्राशस्त्यमस्त्येव। मंदवारे प्रदोषो यं दुर्लभः
सर्वदेहिनां। तत्रापि दुर्लभस्तस्मिन् कृष्णपक्षे समागतः इति ब्रह्मोत्तरखंडात्। एवं व्रतादेन(?) द्वादशी योगोपि प्रशस्तः।
सायंसंध्याप्रदोषस्तु त्रयोदश्यां शनैर्दिने। शुभ(?)तेषु कृष्णपक्षे तु शिवं दृष्ट्वा महत्सुखं। उदये द्वादश्यां किंचित्प्रदोषे तु त्रयोद
श्यां शिवं दृष्ट्वा महत्पुण्यं मंदवारेन्वयो(?)त्तमेति संवत्सरदीपिकोक्तेः सनत्कुमारोक्तेः। अत्र च कश्चित् शुक्लपक्षोक्तेः कश्चित् कृष्ण
पक्षाभिधानं द्वयोः पक्षयोरविशेषेण च यानि। अत एव तत्रैव। शनिप्रदोषे संप्राप्ते शुक्लपक्षेऽथवा द्विजाः पक्षद्वये त्रयोदश्यां नि थ
शाहारो महेश्वरमित्यागस्त्यवचनमुपपद्यते इत्युक्तं। अत्रेदं बोध्यं। अद्यपि काम्यव्रते शनावारेभिविधानादन्यत्रापि रोहिणी
(?)च जन्माष्टम्यादौ बुधवारादिरिवात्रापि शनेः प्राशस्त्यमात्रं प्रतीयते तथापि शनिप्रदोषव्रतं पृथगपि पक्षव्रता
दस्ति। अत एव पार्वतीप्रश्ने ईश्वर उवाच। स्यादिदं एवं संवत्सरं कुर्यात् त्रयोदश्यामिदं व्रतम्। संतत्युत्तरमभिधाय अथवा
मंदवारेण युक्तामेव त्रयोदशीं। चतुर्विंशति कुर्वीत सोभीष्टं फलमाप्नुयात्। इति काम्यप्रकारं तत्पुत्रं(?) निर्णयामृ
ते स्कांदे। तत्रह्येकमेतत् तेभिमतेनेरंतर्येण व्रतानुष्ठानासंभवात् सांवत्सरव्रतसंकल्पस्य बाधापत्तेः। व्रतांतरत्वे तु संकल्प
स्य भेदान्नैकास्विदनुपपत्तिः। अत एव प्रदोषव्रतान्यनि(?)प्रदोषव्रते पूजाकथादिकं पृथगुपलभ्यते नचैवं न्यायसाम्या
द्रोमादियोगेपि व्रतांतराणि भवेयुरिति वाच्यं शनेरिवतत्रापि विशेषोपलब्ध्याविशापत्तेः। तस्माच्छनिप्रदोषव्रतं पक्षव्रता
त्पृथक् तान्नीनेयश्च पृथगेवेति सुधियो विभावयंतु इति दिक्॥ अत्र प्रदोषो निर्णीतप्रायो योसिस्य प्रतिपत्त्येयुपपन्नं निर् नत्के २
णीयते। अत्रापि त्रयोदशी प्रदोषव्यापिनी ग्राह्या तत्रैव पूजायाविहितत्वेन कर्मकालत्वात्। कर्मणो यस्य यः कालः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६

इतिसामान्यशास्त्रानुग्रहात्प्रदोषोप्यस्तानंतरमुहूर्त्तत्रयात्मकएवमुहूर्त्तद्वयात्मामुहूर्त्तात्मकोवानव्रतनिर्णा
यकोऽपित्वनध्यायादिप्रयोजकएवेत्यादिप्रागेवप्रपंचितं।यत्त्वस्तात्प्रागुत्तरंचैवनाडीत्रयमुदाहृतमित्युक्तेरस्ता
त्पूर्वंपरतश्चघटीत्रयंप्रदोषकालइत्याचक्षतेतत्राकरश्चिंत्यः।किंचाह्निनद्वयेप्यस्तोत्तरंत्रयोदशीविरहे
सायाह्नव्यापिन्युत्तरदिनेव्रतप्रसक्तावुक्तवाक्येनमुख्यस्यैवप्रदोषस्यलाभात्तस्यागौणानाभावात्तत्रैवपू
जाभोजनादिप्रसंगेनसंध्यावंदनोत्तरकालेपूजाविधानंव्याकुप्येत।।त्रिमुहूर्त्तःप्रदोषःस्याद्भानावस्तंगतेस
ति।तत्रनक्तंप्रकुर्वीतइतिशास्त्रस्यानिश्चयइतिनिष्कर्षमभिदधन्यासोप्यत्रानुकूलः।।रत्नाकरत्वेपिवान
ध्यायादिप्रयोजकत्वमेकस्तांनत्वव्रतविषयत्वंतद्वचनस्यबहुवचनव्याकोपापत्तेः।मूलेक्यपकल्पनालंघ
वाच्चेत्यास्तांतावत्।प्रदोषव्याप्तिरपिनक्तइवात्रापिषोढा।तत्रप्रथमद्वितीययोरसंदेहएवउभयत्रासत्वेत्व
७ तथात्वेपरत्रेत्युक्त्यापरैव।उभयत्रापिपूर्णव्याप्तौसदेवतिथ्योरित्युक्तेःपरा।उभयत्रसमांशव्याप्तौसैकल्प्यपू
कालव्यापित्वात्परा।वैषम्येत्वाधिक्यान्निर्णयइत्युक्तमेव।यत्तुउभयत्रासत्वेसत्वेवात्रयोदशीतुकर्त्त
व्याद्वादशीसहितामुनेइतिसुमंतूक्तेःपूर्वेतिकश्चित्तन्न।अस्यवचनस्यप्रदोषेतव्रतविषयत्वेनत्वन्धा
वकाशशास्त्रविरोधविषयेप्रसरानवकाशात्।तथात्वेतुशुक्लेपूर्वाकृष्णेपरेत्यर्थकवाक्यशेषेणषष्ठ्याष्टमीत्वमा ६
वास्याकृष्णपक्षेत्रयोदशी।एताःप्रशस्ताःपञ्जाःपराःपरेयमास्त्वशेषितिवचनाच्चतथानष्टानापत्तिः।नचेष्टापत्तिःशि

KKSU LIBRARY RAMTEK 441 106 M-1641 Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्नाशाद्विषयत्वादिरूहुः॥अत्रपक्षप्रदोषशनिप्रदोषोभयव्रतीनएकस्यामेवतिथौदेवतैक्येनशनिप्रदोषव्रतानुष्ठानादेवनित्यस्यप्र
गासिद्धिःयदितुत्रयोदशीपूर्वत्रपरत्रवासंपूर्णप्रदोषव्यापिनीपरत्रपूर्वस्मिन्नेवप्रदोषैकदेशव्याप्तिःशनियोगश्चतदापूर्वत्रपरस्यांवा
नसप्रदोषव्रतंविधायपरत्रपूर्वस्यांवाशनियोगेसंवत्सरनियंत्रितंशनिप्रदोषव्रतंकुर्यात्॥शनौप्रदोषेत्रयोदशीसत्वेनतत्यागमाना
नावात्॥एवमुभयत्रसमांशव्याप्तौपूर्वत्रशनियोगेशनिप्रदोषव्रतंविधायपरत्रनित्यव्रतंकार्यंपरत्रैवशनियोगेतुशनिप्रदोषानुष्ठानेन दे
नित्यस्यगतार्थत्वान्नद्विनद्वयानुष्ठानं॥उभयत्रासत्वेतुनव्रतद्वयाचरणमपितुनित्यमेवेतिसुधीभिराकलनीयमितिदिक्॥न्यग्रोध
मूलनिलयंमुनीनां॥शीतांशुबिंबवदनंसदनंशिवानां॥संसारतापदहनंदहनंदधानमाख्यानमुद्धितकरंमहसाविरस्तुादेवापा
व्यमुकुंदगजनुषानक्तनिर्णयः॥उन्नीतोमणिरामेणतेनतुष्यतुविश्वदृक्॥२॥इतिनक्तनिर्णयः॥संवत्१८९०शके१७५५
वैशाखकृष्णपंचम्यांसमाप्तः॥श्रीसांबशिवार्पणमस्तु॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥

काशीनाथ त्र्यंबक [illegible]
ऋग्वेद ग्रं५१.५
[illegible] उज्जैन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=23.09.20 10:47
,TRANSFERRED=2020/09/23 at 10:49:15
,PAGES=13
,TYPE=STD
,NAME=S0003660
,Book Name=M-1641-NAKTNIRNAY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection